दुर्गा सप्तशती — अध्याय 2

Durga Saptashati — Chapter 2

Source: Selected 1894 ancient core — chapter 2. Also compared: Opening speaker — physical scan 95; Ending and colophon — physical scan 119; Verified 1894 imprint — physical scan 7; Ancient Sanskrit comparison only — independently inspected recitation edition.

प्रारम्भ — वक्ता

SPEAKER

ऋषिरुवाच।

ṛṣiruvāca|

अध्याय 2 — महिषासुरसैन्यवध

TEXT POSITION 1

देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा।
महिषेऽसुराणामधिपे देवानां च पुरन्दरे॥

devāsuramabhūdyuddhaṃ pūrṇamabdaśataṃ purā|
mahiṣe'surāṇāmadhipe devānāṃ ca purandare||

TEXT POSITION 2

तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितम्।
जित्वा च सकलान्देवानिन्द्रोऽभून्महिषासुरः॥

tatrāsurairmahāvīryairdevasainyaṃ parājitam|
jitvā ca sakalāndevānindro'bhūnmahiṣāsuraḥ||

TEXT POSITION 3

ततः पराजिता देवाः पद्मयोनिं प्रजापतिम्।
पुरस्कृत्य गतास्तत्र यत्रेशगरुडध्वजौ॥

tataḥ parājitā devāḥ padmayoniṃ prajāpatim|
puraskṛtya gatāstatra yatreśagaruḍadhvajau||

TEXT POSITION 4

यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितम्।
त्रिदशाः कथयामासुर्देवाभिभवविस्तरम्॥

yathāvṛttaṃ tayostadvanmahiṣāsuraceṣṭitam|
tridaśāḥ kathayāmāsurdevābhibhavavistaram||

TEXT POSITION 5

सूर्येन्द्राग्न्यनिलेन्दूनां यमस्य वरुणस्य च।
अन्येषां चाधिकारान्स स्वयमेवाधितिष्ठति॥

sūryendrāgnyanilendūnāṃ yamasya varuṇasya ca|
anyeṣāṃ cādhikārānsa svayamevādhitiṣṭhati||

TEXT POSITION 6

स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि।
विचरन्ति यथा मर्त्या महिषेण दुरात्मना॥

svargānnirākṛtāḥ sarve tena devagaṇā bhuvi|
vicaranti yathā martyā mahiṣeṇa durātmanā||

TEXT POSITION 7

एतद्वः कथितं सर्वममरारिविचेष्टितम्।
शरणं वः प्रपन्नाः स्मो वधस्तस्य विचिन्त्यताम्॥

etadvaḥ kathitaṃ sarvamamarāriviceṣṭitam|
śaraṇaṃ vaḥ prapannāḥ smo vadhastasya vicintyatām||

TEXT POSITION 8

इत्थं निशम्य देवानां वचांसि मधुसूदनः।
चकार कोपं शम्भुश्च भ्रुकुटीकुटिलाननौ॥

itthaṃ niśamya devānāṃ vacāṃsi madhusūdanaḥ|
cakāra kopaṃ śambhuśca bhrukuṭīkuṭilānanau||

TEXT POSITION 9

ततोऽतिकोपपूर्णस्य चक्रिणो वदनात्ततः।
निश्चक्राम महत्तेजो ब्रह्मणः शंकरस्य च॥

tato'tikopapūrṇasya cakriṇo vadanāttataḥ|
niścakrāma mahattejo brahmaṇaḥ śaṃkarasya ca||

TEXT POSITION 10

अन्येषां चैव देवानां शक्रादीनां शरीरतः।
निर्गतं सुमहत्तेजस्तच्चैक्यं समगच्छत॥

anyeṣāṃ caiva devānāṃ śakrādīnāṃ śarīrataḥ|
nirgataṃ sumahattejastaccaikyaṃ samagacchata||

TEXT POSITION 11

अतीव तेजसः कूटं ज्वलन्तमिव पर्वतम्।
ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगन्तरम्॥

atīva tejasaḥ kūṭaṃ jvalantamiva parvatam|
dadṛśuste surāstatra jvālāvyāptadigantaram||

TEXT POSITION 12

अतुलं तत्र तत्तेजः सर्वदेवशरीरजम्।
एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा॥

atulaṃ tatra tattejaḥ sarvadevaśarīrajam|
ekasthaṃ tadabhūnnārī vyāptalokatrayaṃ tviṣā||

TEXT POSITION 13

यदभूच्छाम्भवं तेजस्तेनाजायत तन्मुखम्।
याम्येन चाभवन्केशा बाहवो विष्णुतेजसा॥

yadabhūcchāmbhavaṃ tejastenājāyata tanmukham|
yāmyena cābhavankeśā bāhavo viṣṇutejasā||

TEXT POSITION 14

सौम्येन स्तनयोर्युग्मं मध्यमैन्द्रेण चाभवत्।
वारुणेन च जङ्घोरू नितम्बस्तेजसा भुवः॥

saumyena stanayoryugmaṃ madhyamaindreṇa cābhavat|
vāruṇena ca jaṅghorū nitambastejasā bhuvaḥ||

TEXT POSITION 15

ब्रह्मणस्तेजसा पादौ तदङ्गुल्योऽर्कतेजसा।
वसूनां च कराङ्गुल्यः कौबेरेण च नासिका॥

brahmaṇastejasā pādau tadaṅgulyo'rkatejasā|
vasūnāṃ ca karāṅgulyaḥ kaubereṇa ca nāsikā||

TEXT POSITION 16

तस्यास्तु दन्ताः संभूताः प्राजापत्येन तेजसा।
नयनत्रितयं जज्ञे तथा पावकतेजसा॥

tasyāstu dantāḥ saṃbhūtāḥ prājāpatyena tejasā|
nayanatritayaṃ jajñe tathā pāvakatejasā||

TEXT POSITION 17

भ्रुवौ च संध्ययोस्तेजः श्रवणावनिलस्य च।
अन्येषां चैव देवानां संभवस्तेजसां शिवा॥

bhruvau ca saṃdhyayostejaḥ śravaṇāvanilasya ca|
anyeṣāṃ caiva devānāṃ saṃbhavastejasāṃ śivā||

TEXT POSITION 18

ततः समस्तदेवानां तेजोराशिसमुद्भवाम्।
तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः॥

tataḥ samastadevānāṃ tejorāśisamudbhavām|
tāṃ vilokya mudaṃ prāpuramarā mahiṣārditāḥ||

Note: The smaller parenthesized extra verse about the gods giving weapons occurs inside commentary, with its own 19, before the large main-core 19. Comparison leaf 93 mentions it only in a footnote. Exclude it from this main-core packet; do not renumber or silently import it.

TEXT POSITION 19

शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृक्।
चक्रं च दत्तवान्कृष्णः समुत्पाट्य स्वचक्रतः॥

śūlaṃ śūlādviniṣkṛṣya dadau tasyai pināKadhṛk|
cakraṃ ca dattavānkṛṣṇaḥ samutpāṭya svacakrataḥ||

TEXT POSITION 20

शङ्खं च वरुणः शक्तिं ददौ तस्यै हुताशनः।
मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधी॥

śaṅkhaṃ ca varuṇaḥ śaktiṃ dadau tasyai hutāśanaḥ|
māruto dattavāṃścāpaṃ bāṇapūrṇe tatheṣudhī||

Note: Preserve main बाणपूर्णे; footnote prints बाणपूर्णौ. Literal Roman and original dual-quiver meanings checked.

TEXT POSITION 21

वज्रमिन्द्रः समुत्पाट्य कुलिशादमराधिपः।
ददौ तस्यै सहस्राक्षो घण्टामैरावताद्गजात्॥

vajramindraḥ samutpāṭya kuliśādamarādhipaḥ|
dadau tasyai sahasrākṣo ghaṇṭāmairāvatādgajāt||

TEXT POSITION 22

कालदण्डाद्यमो दण्डं पाशं चाम्बुपतिर्ददौ।
प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमण्डलुम्॥

kāladaṇḍādyamo daṇḍaṃ pāśaṃ cāmbupatirdadau|
prajāpatiścākṣamālāṃ dadau brahmā kamaṇḍalum||

TEXT POSITION 23

समस्तरोमकूपेषु निजरश्मीन्दिवाकरः।
कालश्च दत्तवान्खड्गं तस्याश्चर्म च निर्मलम्॥

samastaromakūpeṣu nijaraśmīndivākaraḥ|
kālaśca dattavānkhaḍgaṃ tasyāścarma ca nirmalam||

TEXT POSITION 24

क्षीरोदश्चामलं हारमजरे च तथाम्बरे।
चूडामणिं तथा दिव्यं कुण्डले कटकानि च॥

kṣīrodaścāmalaṃ hāramajare ca tathāmbare|
cūḍāmaṇiṃ tathā divyaṃ kuṇḍale kaṭakāni ca||

TEXT POSITION 25

अर्धचन्द्रं तथा दिव्यं केयूरान्सर्वबाहुषु।
नूपुरौ विमलौ तद्ग्रैवेयकमनुत्तमम्॥

ardhacandraṃ tathā divyaṃ keyūrānsarvabāhuṣu|
nūpurau vimalau tadgraiveyakamanuttamam||

TEXT POSITION 26

अङ्गुलीयकरत्नानि समस्तास्वङ्गुलीषु च।
विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलम्॥

aṅgulīyakaratnāni samastāsvaṅgulīṣu ca|
viśvakarmā dadau tasyai paraśuṃ cātinirmalam||

TEXT POSITION 27

अस्त्राण्यनेकरूपाणि तथाभेद्यं च दंशनम्।
अम्लानपङ्कजां मालां शिरस्युरसि चापराम्॥

astrāṇyanekarūpāṇi tathābhedyaṃ ca daṃśanam|
amlānapaṅkajāṃ mālāṃ śirasyurasi cāparām||

TEXT POSITION 28

अददज्जलधिस्तस्यै पङ्कजं चातिशोभनम्।
हिमवान्वाहनं सिंहं रत्नानि विविधानि च॥

adadajjaladhistasyai paṅkajaṃ cātiśobhanam|
himavānvāhanaṃ siṃhaṃ ratnāni vividhāni ca||

TEXT POSITION 29

ददावशून्यं सुरया पानपात्रं धनाधिपः।
शेषश्च सर्वनागेशो महामणिविभूषितम्॥

dadāvaśūnyaṃ surayā pānapātraṃ dhanādhipaḥ|
śeṣaśca sarvanāgeśo mahāmaṇivibhūṣitam||

TEXT POSITION 30

नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमाम्।
अन्यैरपि सुरैर्देवी भूषणैरायुधैस्तथा॥

nāgahāraṃ dadau tasyai dhatte yaḥ pṛthivīmimām|
anyairapi surairdevī bhūṣaṇairāyudhaistathā||

TEXT POSITION 31

संमानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः।
तस्या नादेन घोरेण कृत्स्नमापूरितं नभः॥

saṃmānitā nanādoccaiḥ sāṭṭahāsaṃ muhurmuhuḥ|
tasyā nādena ghoreṇa kṛtsnamāpūritaṃ nabhaḥ||

TEXT POSITION 32

अमायतातिमहता प्रतिशब्दो महानभूत्।
चुक्षुभुः सकला लोकाः समुद्राश्च चकम्पिरे॥

amāyatātimahatā pratiśabdo mahānabhūt|
cukṣubhuḥ sakalā lokāḥ samudrāśca cakampire||

TEXT POSITION 33

चचाल वसुधा चेलुः सकलाश्च महीधराः।
जयेति देवाश्च मुदा तामूचुः सिंहवाहिनीम्॥

cacāla vasudhā celuḥ sakalāśca mahīdharāḥ|
jayeti devāśca mudā tāmūcuḥ siṃhavāhinīm||

Note: Preserve main देवाश्च मुदा तामूचुः सिंहवाहिनीम्; footnote cites जयेति च मुदा देवास्तामूचुः सिंहवाहिनीम् as the Shantanavi reading.

TEXT POSITION 34

तुष्टुवुर्मुनयश्चैनां भक्तिनम्रात्ममूर्तयः।
दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः॥

tuṣṭuvurmunayaścainām bhaktinamrātmamūrtayaḥ|
dṛṣṭvā samastaṃ saṃkṣubdhaṃ trailokyamamarārayaḥ||

TEXT POSITION 35

सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः।
आः किमेतदिति क्रोधादाभाष्य महिषासुरः॥

sannaddhākhilasainyāste samuttasthurudāyudhāḥ|
āḥ kimetaditi krodhādābhāṣya mahiṣāsuraḥ||

TEXT POSITION 36

अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः।
स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा॥

abhyadhāvata taṃ śabdamaśeṣairasurairvṛtaḥ|
sa dadarśa tato devīṃ vyāptalokatrayāṃ tviṣā||

TEXT POSITION 37

पादाक्रान्त्या नतभुवं किरीटोल्लिखिताम्बराम्।
क्षोभिताशेषपातालां धनुर्ज्यानिःस्वनेन ताम्॥

pādākrāntyā natabhuvaṃ kirīṭollikhitāmbarām|
kṣobhitāśeṣapātālāṃ dhanurjyāniḥsvanena tām||

TEXT POSITION 38

दिशो भुजसहस्रेण समन्ताद्व्याप्य संस्थिताम्।
ततः प्रववृते युद्धं तया देव्या सुरद्विषाम्॥

diśo bhujasahasreṇa samantādvyāpya saṃsthitām|
tataḥ pravavṛte yuddhaṃ tayā devyā suradviṣām||

TEXT POSITION 39

शस्त्रास्त्रैर्बहुधा मुक्तैरादीपितदिगन्तरम्।
महिषासुरसेनानीश्चिक्षुराख्यो महासुरः॥

śastrāstrairbahudhā muktairādīpitadigantaram|
mahiṣāsurasenānīścikṣurākhyo mahāsuraḥ||

TEXT POSITION 40

युयुधे चामरश्चान्यैश्चतुरङ्गबलान्वितः।
रथानामयुतैः षड्भिरुदग्राख्यो महासुरः॥

yuyudhe cāmaraścānyaiścaturaṅgabalānvitaḥ|
rathānāmayutaiḥ ṣaḍbhirudagrākhyo mahāsuraḥ||

TEXT POSITION 41

अयुध्यतायुतानां च सहस्रेण महाहनुः।
पञ्चाशद्भिश्च नियुतैरसिलोमा महासुरः॥

ayudhyatāyutānāṃ ca sahasreṇa mahāhanuḥ|
pañcāśadbhiśca niyutairasilomā mahāsuraḥ||

TEXT POSITION 42

अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे।
गजवाजिसहस्रौघैरनेकैः परिवारितः॥

ayutānāṃ śataiḥ ṣaḍbhirbāṣkalo yuyudhe raṇe|
gajavājisahasraughairanekaiḥ parivāritaḥ||

TEXT POSITION 43

वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत।
विडालाख्योऽयुतानां च पञ्चाशद्भिरथायुतैः॥

vṛto rathānāṃ koṭyā ca yuddhe tasminnayudhyata|
viḍālākhyo'yutānāṃ ca pañcāśadbhirathāyutaiḥ||

Note: Preserve main विडालाख्यो; the footnote and commentary discuss विडालाक्ष / विडालाख्यो महादैत्यः alternatives. Do not silently harmonize the name.

TEXT POSITION 44

युयुधे संयुगे तत्र रथानां परिवारितः।
अन्ये च तत्रायुतशो रथनागहयैर्वृताः॥

yuyudhe saṃyuge tatra rathānāṃ parivāritaḥ|
anye ca tatrāyutaśo rathanāgahayairvṛtāḥ||

Note: The parenthesized कालो verse occurs inside Shantanavi commentary, not large main core. Exclude it, as with the smaller optional verse after 18.

TEXT POSITION 45

युयुधुः संयुगे देव्या सह तत्र महासुराः।
कोटिकोटिसहस्रैस्तु रथानां दन्तिनां तथा॥

yuyudhuḥ saṃyuge devyā saha tatra mahāsurāḥ|
koṭikoṭisahasraistu rathānāṃ dantināṃ tathā||

TEXT POSITION 46

हयानां च वृतो युद्धे तत्राभून्महिषासुरः।
तोमरैर्भिन्दिपालैश्च शक्तिभिर्मुसलैस्तथा॥

hayānāṃ ca vṛto yuddhe tatrābhūnmahiṣāsuraḥ|
tomarairbhindipālaiśca śaktibhirmusalaistathā||

TEXT POSITION 47

युयुधुः संयुगे देव्या खड्गैः परशुपट्टिशैः।
केचिच्च चिक्षिपुः शक्तीः केचित्पाशांस्तथापरे॥

yuyudhuḥ saṃyuge devyā khaḍgaiḥ paraśupaṭṭiśaiḥ|
kecicca cikṣipuḥ śaktīḥ kecitpāśāṃstathāpare||

TEXT POSITION 48

देवीं खड्गप्रहारैस्तु ते तां हन्तुं प्रचक्रमुः।
सापि देवी ततस्तानि शस्त्राण्यस्त्राणि चण्डिका॥

devīṃ khaḍgaprahāraistu te tāṃ hantuṃ pracakramuḥ|
sāpi devī tatastāni śastrāṇyastrāṇi caṇḍikā||

TEXT POSITION 49

लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षिणी।
अनायस्तानना देवी स्तूयमाना सुरर्षिभिः॥

līlayaiva pracicchеda nijaśastrāstravarṣiṇī|
anāyastānanā devī stūyamānā surarṣibhiḥ||

TEXT POSITION 50

मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी।
सोऽपि क्रुद्धो धुतसटो देव्या वाहनकेसरी॥

mumocāsuradeheṣu śastrāṇyastrāṇi ceśvarī|
so'pi kruddho dhutasaṭo devyā vāhanakesarī||

TEXT POSITION 51

चचारासुरसैन्येषु वनेष्विव हुताशनः।
निःश्वासान्मुमुचे यांश्च युध्यमाना रणेऽम्बिका॥

cacārāsurasainyeṣu vaneṣviva hutāśanaḥ|
niḥśvāsānmumuce yāṃśca yudhyamānā raṇe'mbikā||

TEXT POSITION 52

त एव सद्यः संभूता गणाः शतसहस्रशः।
युयुधुस्ते परशुभिर्भिन्दिपालासिपट्टिशैः॥

ta eva sadyaḥ saṃbhūtā gaṇāḥ śatasahasraśaḥ|
yuyudhuste paraśubhirbhindipālāsipaṭṭiśaiḥ||

TEXT POSITION 53

नाशयन्तोऽसुरगणान्देवीशक्त्युपबृंहिताः।
अवादयन्त पटहान्गणाः शङ्खांस्तथापरे॥

nāśayanto'suragaṇāndevīśaktyupabṛṃhitāḥ|
avādayanta paṭahāngaṇāḥ śaṅkhāṃstathāpare||

TEXT POSITION 54

मृदङ्गांश्च तथैवान्ये तस्मिन्युद्धमहोत्सवे।
ततो देवी त्रिशूलेन गदया शक्तिवृष्टिभिः॥

mṛdaṅgāṃśca tathaivānye tasminyuddhamahotsave|
tato devī triśūlena gadayā śaktivṛṣṭibhiḥ||

Note: Preserve main शक्तिवृष्टिभिः; footnote records शक्त्यृष्टिभिः.

TEXT POSITION 55

खड्गादिभिश्च शतशो निजघान महासुरान्।
पातयामास चैवान्यान्घण्टास्वनविमोहितान्॥

khaḍgādibhiśca śataśo nijaghāna mahāsurān|
pātayāmāsa caivānyānghaṇṭāsvanavimohitān||

TEXT POSITION 56

असुरान्भुवि पाशेन बद्ध्वा चान्यानकर्षयत।
केचिद्द्विधा कृतास्तीक्ष्णैः खड्गपातैस्तथापरे॥

asurānbhuvi pāśena baddhvā cānyānakarṣayata|
keciddvidhā kṛtāstīkṣṇaiḥ khaḍgapātaistathāpare||

TEXT POSITION 57

विपोथिता निपातेन गदया भुवि शेरते।
वेमुश्च केचिद्रुधिरं मुसलेन भृशं हताः॥

vipothitā nipātena gadayā bhuvi śerate|
vemuśca kecidrudhiraṃ musalena bhṛśaṃ hatāḥ||

TEXT POSITION 58

केचिन्निपतिता भूमौ भिन्नाः शूलेन वक्षसि।
निरन्तराः शरौघेण कृताः केचिद्रणाजिरे॥

kecinnipatitā bhūmau bhinnāḥ śūlena vakṣasi|
nirantarāḥ śaraugheṇa kṛtāḥ kecidraṇājire||

TEXT POSITION 59

सेनानुकारिणः प्राणान्मुमुचुस्त्रिदशार्दनाः।
केषांचिद्बाहवश्छिन्नाश्छिन्नग्रीवास्तथापरे॥

senānukāriṇaḥ prāṇānmumucustridaśārdanāḥ|
keṣāṃcidbāhavaścinnāścchinnagrīvāstathāpare||

Note: Preserve main सेनानुकारिणः; footnote records शैलानुकारिणः and श्येनानुकारिणः. Meanings preserve the army context without importing mountain or falcon variants.

TEXT POSITION 60

शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः।
विच्छिन्नजङ्घास्त्वपरे पेतुरुर्व्यां महासुराः॥

śirāṃsi peturanyeṣāmanye madhye vidāritāḥ|
vicchinnajaṅghāstvapare petururvyāṃ mahāsurāḥ||

TEXT POSITION 61

एकबाह्वक्षिचरणाः केचिद्देव्या द्विधा कृताः।
छिन्नेऽपि चान्ये शिरसि पतिताः पुनरुत्थिताः॥

ekabāhvakṣicaraṇāḥ keciddevyā dvidhā kṛtāḥ|
chinne'pi cānye śirasi patitāḥ punarutthitāḥ||

TEXT POSITION 62

कबन्धा युयुधुर्देव्या गृहीतपरमायुधाः।
ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः॥

kabandhā yuyudhurdevyā gṛhītaparamāyudhāḥ|
nanṛtuścāpare tatra yuddhe tūryalayāśritāḥ||

Note: Preserve main तूर्यलयाश्रिताः; footnote records तूर्यलयान्विताः.

TEXT POSITION 63

कबन्धाश्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः।
तिष्ठ तिष्ठेति भाषन्तो देवीमन्ये महासुराः॥

kabandhāścchinnaśirasaḥ khaḍgaśaktyṛṣṭipāṇayaḥ|
tiṣṭha tiṣṭheti bhāṣanto devīmanye mahāsurāḥ||

TEXT POSITION 64

पातितै रथनागाश्वैरसुरैश्च वसुंधरा।
अगम्या साभवत्तत्र यत्राभूत्स महारणः॥

pātitai rathanāgāśvairasuraiśca vasuṃdharā|
agamyā sābhavattatra yatrābhūtsa mahāraṇaḥ||

TEXT POSITION 65

शोणितौघा महानद्यः सद्यस्तत्र विसुस्रुवुः।
मध्ये चासुरसैन्यस्य वारणासुरवाजिनाम्॥

śoṇitaughā mahānadyaḥ sadyastatra visusruvuḥ|
madhye cāsurasainyasya vāraṇāsuravājinām||

TEXT POSITION 66

क्षणेन तन्महासैन्यमसुराणां तथाम्बिका।
निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयम्॥

kṣaṇena tanmahāsainyamasurāṇāṃ tathāmbikā|
ninye kṣayaṃ yathā vahnistṛṇadārumahācayam||

TEXT POSITION 67

स च सिंहो महानादमुत्सृजन्धुतकेसरः।
शरीरेभ्योऽमरारीणामसूनिव विचिन्वति॥

sa ca siṃho mahānādamutsṛjandhutakesaraḥ|
śarīrebhyo'marārīṇāmasūniva vicinvati||

TEXT POSITION 68

देव्या गणैश्च तैस्तत्र कृतं युद्धं तथासुरैः।
यथैषां तुतुषुर्देवाः पुष्पवृष्टिमुचो दिवि॥

devyā gaṇaiśca taistatra kṛtaṃ yuddhaṃ tathāsuraiḥ|
yathaiṣāṃ tutuṣurdevāḥ puṣpavṛṣṭimuco divi||

समापन — पुष्पिका

COLOPHON

इति श्रीमार्कण्डेयपुराणे देवीमाहात्म्ये महिषासुरसैन्यवधो नाम द्वितीयोऽध्यायः॥२॥

iti śrīmārkaṇḍeyapurāṇe devīmāhātmye mahiṣāsurasainyavadho nāma dvitīyo'dhyāyaḥ||2||